Naradakritam 2 Shri Krishna Stotram

# નારદકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Naradakritam 2 Shri Krishna Stotram

File name : nAradakRRitaM2shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/37/11-24||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 4, 2025

*sanskritdocuments.org*

# નારદકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

કૃષ્ણ કૃષ્ણાપ્રમેયાત્મન્ યોગેશ જગદીશ્વર ।
વાસુદેવાખિલાવાસ સાત્વતાં પ્રવર પ્રભો ॥ ૧૧॥

ત્વમાત્મા સર્વભૂતાનામેકો જ્યોતિરિવૈધસામ્ ।
ગૂઢો ગુહાશયઃ સાક્ષી મહાપુરુષ ઈશ્વરઃ ॥ ૧૨॥

આત્મનાઽઽત્માઽઽશ્રયઃ પૂર્વં માયયા સસૃજે ગુણાન્ ।
તૈરિદં સત્યસઙ્કલ્પઃ સૃજસ્યત્સ્યવસીશ્વરઃ ॥ ૧૩॥

સ ત્વં ભૂધરભૂતાનાં દૈત્યપ્રમથરક્ષસામ્ ।
અવતીર્ણો વિનાશાય સેતૂનાં રક્ષણાય ચ ॥ ૧૪॥

દિષ્ટ્યા તે નિહતો દૈત્યો લીલયાયં હયાકૃતિઃ ।
યસ્ય હેષિતસન્ત્રસ્તાસ્ત્યજન્ત્યનિમિષા દિવમ્ ॥ ૧૫॥

ચાણૂરં મુષ્ટિકં ચૈવ મલ્લાનન્યાંશ્ચ હસ્તિનમ્ ।
કંસં ચ નિહતં દ્રક્ષ્યે પરશ્વોઽહનિ તે વિભો ॥ ૧૬॥

તસ્યાનુ શઙ્ખયવનમુરાણાં નરકસ્ય ચ ।
પારિજાતાપહરણમિન્દ્રસ્ય ચ પરાજયમ્ ॥ ૧૭॥

ઉદ્વાહં વીરકન્યાનાં વીર્યશુલ્કાદિલક્ષણમ્ ।
નૃગસ્ય મોક્ષણં પાપાદ્દ્વારકાયાં જગત્પતે ॥ ૧૮॥

સ્યમન્તકસ્ય ચ મણેરાદાનં સહ ભાર્યયા ।
મૃતપુત્રપ્રદાનં ચ બ્રાહ્મણસ્ય સ્વધામતઃ ॥ ૧૯॥

પૌણ્ડ્રકસ્ય વધં પશ્ચાત્કાશિપુર્યાશ્ચ દીપનમ્ ।
દન્તવક્ત્રસ્ય નિધનં ચૈદ્યસ્ય ચ મહાક્રતૌ ॥ ૨૦॥

યાનિ ચાન્યાનિ વીર્યાણિ દ્વારકામાવસન્ ભવાન્ ।
કર્તા દ્રક્ષ્યામ્યહં તાનિ ગેયાનિ કવિભિર્ભુવિ ॥ ૨૧॥

અથ તે કાલરૂપસ્ય ક્ષપયિષ્ણોરમુષ્ય વૈ ।
અક્ષૌહિણીનાં નિધનં દ્રક્ષ્યામ્યર્જુનસારથેઃ ॥ ૨૨॥

વિશુદ્ધવિજ્ઞાનઘનં સ્વસંસ્થયા
સમાપ્તસર્વાર્થમમોઘવાઞ્છિતમ્ ।
સ્વતેજસા નિત્યનિવૃત્તમાયા-
ગુણપ્રવાહં ભગવન્તમીમહિ ॥ ૨૩॥

ત્વામીશ્વરં સ્વાશ્રયમાત્મમાયયા
વિનિર્મિતાશેષવિશેષકલ્પનમ્ ।
ક્રીડાર્થમદ્યાત્તમનુષ્યવિગ્રહં
નતોઽસ્મિ ધુર્યં યદુવૃષ્ણિસાત્વતામ્ ॥ ૨૪॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે પૂર્વાર્ધે સપ્તત્રિંશાધ્યાયાન્તર્ગતં
નારદકૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૩૭/૧૧-૨૪॥

bhAgavatapurANa . adhyAya 10/37/11-24..

Proofread by PSA Easwaran

*Naradakritam 2 Shri Krishna Stotram*
pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*